This question paper contains 8 printed pages]

*Your Roll No* ...............

**6376**

**B.A. (Hons.)/I (New Course)** **E**

SANSKRIT—Paper II

(Prose)

*Time : 3 Hours* *Maximum Marks* : 75

*(Write your Roll No. on the top immediately on receipt of this question paper.)*

*Note* :— Unless otherwise required in a question, answers should be written in Sanskrit *or* in Hindi *or* in English; but the same medium should be used throughout the paper.

**टिप्पणी** :—अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर संस्कृत या हिंदी या अंग्रेजी किसी एक भाषा में दीजिए; परन्तु सभी उत्तरों का माध्यम **एक** ही होना चाहिए ।

*All* questions are compulsory.

**सभी** प्रश्नों के उत्तर अनिवार्य हैं ।

1. निम्नलिखित का सप्रसंग अनुवाद कीजिए : 4×6=24

Translate the following with reference to the context :

(क) अधीष्व तावद्दण्डनीतिम् । इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता । स 'तथा' इत्यधीते शृणोति च । तत्रैव जरां गच्छति । तत्तु किल शास्त्रं शास्त्रान्तरानुबन्धि । सर्वमेव वाङ्मयं विदित्वा न तत्त्वतोऽधिगम्यते । भवतु कालेन बहुनाल्पेन वा तदर्थाधिगतिः । अधिगतशास्त्रेण चादावेव पुत्रदारमपि न विश्वास्यम् । आत्मकुक्षेरपि कृते तण्डुलैरियद्भिरियानोदनः सम्पद्यते । इयत ओदनस्य पाकायैतावदिन्धनं पर्याप्तमिति मानोन्मानपूर्वकं देयम् ।

अथवा/*Or*

देव! यथा मृगया ह्यौपकारिकी न तथाऽन्यत् । अत्र हि व्यायामोत्कर्षादापत्सूपकर्ता दीर्घाध्वलङ्घनक्षमो जङ्घाजवः, कफापचयादारोग्यैकमूलमाशयाग्निदीप्तिः, मदोऽपकर्षादङ्गानां स्थैर्यकार्कश्यातिलाघवादीनि, शीतोष्णवातवर्षक्षुत्पिपासासहत्वम्, सत्त्वानामवस्थान्तरेषु

चित्तचेष्टितज्ञानं; शैलाटवीप्रदेशानां विविधकर्मक्षमाणामालोचनम्, आटविकवर्गविश्रम्भणम्, उत्साहशक्तिसंधुक्षणेन प्रयत्नीकवित्रासमिति बहुतमा गुणाः ।

(ख) आलोकयतु तावत्कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम् उच्चैःश्रवसश्चंचलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम् कौस्तुभमणेरतिनैष्ठुर्यम् इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वैवोद्गता ।

अथवा/*Or*

मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः । पूजयन्ति द्विजातीन् । न मानयन्ति मान्यान् नार्चयन्त्यर्चनीयान् । नाभिवादयन्त्यभिवादार्हान् । नाभ्युत्तिष्ठन्ति गुरून् । अनर्थकायासान्तरितविषयोपभोगसुखमित्यहसन्ति विद्वज्जनम् । जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम् । आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय । कुप्यन्ति हितवादिने । सर्वथा तमभिनन्दन्ति योऽहर्निशमनवरतमुपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति ।

(ग) अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। एष भगवन्मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य कुण्डलमाखण्डलदिशः दीपको ब्रह्माण्डभाण्डस्य प्रेयान् पुण्डरीकपटलस्य शोकविमोकः कोकलोकस्य अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य इनश्च दिनस्य। अयमेवाहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति ।

अथवा/*Or*

वत्स गौरसिंह ! अहमत्यन्तं तुष्यामि त्वयि । यावत्त्वमेकाक्यपजलखानस्य त्रीनश्वान् दासीकृतवान् अथ च ब्राह्मणतनयांश्च मोचयित्वाऽऽनीतवानसि । कथं न भवेरीदृशः ? कुलमेदेदृशं राजपुत्रदेशीयक्षत्रियाणाम् । तावत्पुनरश्रूयत मर्मरः पादक्षेपश्च । ततो विरम्य मुनिः स्वयमुत्थाय प्रोच्चं शिलापीठमेकमारुह्य निपुणतया परितः पश्यन्नपि कारणं किमपि नावलोकयामास चरणाक्षेपशब्दस्य।

(घ) तस्यां च मगधेषु चार्वाकमतमिवाद्वितीयप्रमाणं, पुष्करद्वीपमिव स्वादूदकमध्यगतं, रिपुपुरमिव विशालं, साहित्यशास्त्रमिव बहुविधध्वनिविचारसहितं केनचन वीरेणोल्लसितमारकतेन गृहगणेन राजमानं जीवनमुक्तहृदयमिव संसरणसंकटसहितं, जलमिव सर्वतोमुखं विष्णुपदमिव व्याप्तभूतलं पुष्पपुरं नाम नगरमासीत् ।

**अथवा**/*Or*

तत्र चान्तराश्रितानेकभूभृत् सहस्रविपक्षबलसागराचमनकुम्भसम्भवायमानदोः स्तम्भः, अग्रणीर्गुणशालिनां ललाम कलावतां, प्रवीरः प्रवीणनामसाधारणो धारणावद्बुद्धीनां, धुरीणो धीराणां मान्यो वदान्यानां, निधानं दिशोदण्डस्य, मत्तः परवधे, तृष्णक् धर्मे, क्रुद्धो दुर्विनीतेषु, मूढो दुर्नये, दिग्वधूकर्णावतंसायमानयशः पल्लवो राजा राजशेखरो नाम रराज ।

2. (क) प्रश्न संख्या 1 के किन्हीं **पाँच** रेखाङ्कित पदों पर व्याकरणात्मक टिप्पणियाँ लिखिए : 10

Write grammatical notes on any *five* of the underlined words in question No. 1.

(ख) निम्नलिखित में से किन्हीं **पाँच** पर संक्षिप्त टिप्पणियाँ लिखिए : 5

Write short notes on any *five* of the following :

चार्वाक, विश्रुत, जैगीषव्य, मलयवती, मदजल, उच्चै:श्रवा, अमरावती ।

3. 'दण्डिन: पदलालित्यम्'—इस कथन की समीक्षा कीजिए । 8

Critically analyze the statement 'दण्डिन: पदलालित्यम्.

अथवा/*Or*

दण्डी की शैली का विवेचन कीजिए ।

Critically analyze the style of Dandin.

4. 'पंचाननो बाणः' पर टिप्पणी कीजिए । 8

Comment on 'पंचाननो बाणः'.

अथवा/*Or*

शुकनासोपदेश के अनुसार युवावस्था के दोषों को चिह्नित कीजिए।

Underline the demerits of youthfulness as discussed in शुकनासोपदेश.

5. शिवराजविजयम् में वर्णित भारत दशा का निरूपण कीजिए । 8

Discuss the condition of India in accordance with the शिवराजविजयम्.

अथवा/*Or*

अम्बिकादत्तव्यासजी के जीवन एवं कृतित्व पर निबन्ध लिखिये।

Write an essay on the life and works of Ambikadatta Vyasa.

6. मन्दारमंजरी के आधार पर देवी मलयवती का वर्णन कीजिये। 7

Give an exposition of Queen Malayavati on the basis of Mandara Manjari.

अथवा/*Or*

मन्दारमंजरी के आधार पर पूर्व दिशा का वर्णन कीजिये।

Describe eastern quarter on the basis of Mandara Manjari.

7. **संस्कृत** में उत्तर दीजिए : 5

Answer in **Sanskrit** :

(क) मन्दारमंजरी केन विरचिता ?

(ख) विश्रुतचरिते कस्य कथा प्राप्यते ?

(ग) को विहारभद्रः ?

(घ) शिवराजविजये गौडसिंहस्य सतीर्थ्यस्य किं नाम ?

(ङ) तारापीडः कस्य यौवराज्याभिषेकम् ऐच्छत् ?